सोमस्तोत्रम्

{॥ सोमस्तोत्रम् ॥}

अथ सोमस्तोत्रप्रारम्भः ।

अस्य श्रीसोमस्तोत्रमहामन्त्रस्य गौतम ऋषिः । अनुष्टुप्छन्दः ।

सोमो देवता । सोमप्रीत्यर्थे जपे विनियोगः ।

वां अङ्गुष्ठाभ्यां नमः । वीं तर्जनीभ्यां नमः ।

वूं मध्यमाभ्यां नमः । वैं अनामिकाभ्यां नमः ।

वौं कनिष्ठिकाभ्यां नमः । वः करतलकरपृष्ठाभ्यां नमः ।

वां हृदयाय नमः । वीं शिरसे स्वाहा ।

वूं शिखायै वषट् । वैं कवचाय हुम् ।

वौं नेत्रत्रयाय वौषट् । वः अस्त्राय फट् ।

भूर्भुवः सुवरोमिति दिग्बन्धः ।

ध्यानम् ।

श्वेताम्बरोज्ज्वलतनुं सितमाल्यगन्धं

श्वेताश्वयुक्तरथगं सुरसेविताङ्घ्रिम् ।

दोर्भ्यां धृताभयगदं वरदं सुधांशुं

श्रीवत्समौक्तिकधरं प्रणमामि चन्द्रं ॥ १॥

आग्नेयभागे सरथो दशाश्वश्चात्रेयजो यामुनदेशजश्च ।

प्रत्यङ्मुखस्थश्चतुरश्रपीठे गदाधरो नोऽवतु रोहिणीशः ॥ २॥

चन्द्रं नमामि वरदं शङ्करस्य विभूषणम् ।
कलानिधिं कान्तरूपं केयूरमकुटोज्ज्वलम् ॥ ३॥

वरदं वन्द्यचरणं वासुदेवस्य लोचनम् ।
वसुधाह्लादनकरं विधुं तं प्रणमाम्यहम् ॥ ४॥

श्वेतमाल्याम्बरधरं श्वेतगन्धानुलेपनम् ।
श्वेतछत्रोल्लसन्मौलिं शशिनं प्रणमाम्यहम् ॥ ५॥

सर्वं जगज्जीवयसि सुधारसमयैः करैः ।
सोम देहि ममारोग्यं सुधापूरितमण्डलम् ॥ ६॥

राजा त्वं ब्राह्मणानां च रमाया अपि सोदरः ।
राजा नाथश्चौषधीनां रक्ष मां रजनीकर ॥ ७॥

शङ्करस्य शिरोरत्नं शार्ङ्गिणश्च विलोचनम् ।
तारकाणामधीशस्त्वं तारयाऽस्मान्महापदः ॥ ८॥

कल्याणमूर्ते वरद करुणारसवारिधे ।
कलशोदधिसञ्जातकलानाथ कृपां कुरु ॥ ९॥

क्षीरार्णवसमुद्भूत चिन्तामणिसहोद्भव ।

कामितार्थान् प्रदेहि त्वं कल्पद्रुमसहोदर ॥ १०॥

श्वेताम्बरः श्वेतविभूषणाढ्यो गदाधरः श्वेतरुचिर्द्विबाहुः ।

चन्द्रः सुधात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः ॥ ११॥

इदं निशाकरस्तोत्रं यः पठेत् प्रत्यहं नरः ।

उपद्रवात्स मुच्येत नात्र कार्या विचारणा ॥ १२॥

इति सोमस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by KSR Ramachandran ramachandran\—ksr at

yahoo.ca

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Soma Stotram Lyrics in Devanagari PDF
% File name : somastotram.itx
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Description-comments : From Grantha/Tamil book Adityadi Navagraha Stotra
% Latest update : June 25, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website